अयाचितात् परं नक्तं तस्मान्नक्तेन वर्त्तयेत् ॥
देवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥
सर्व्ववेलामतिक्रम्य नक्ते भुक्तमभोजनम् ।
वामाचारो महादेवो नक्तेनैवोद्धरेन्नृणाम् ॥"
इति देवीपुराणम् ॥
व्रतविशेषः । यथा,—
"दशम्याञ्चैकभक्तन्तु शुद्धचित्तो दृढव्रतः ।
नक्तं वापि तथा कृत्वा दशम्यां नियतः सदा ॥
क्रियते चासमर्थेन नक्तमेकादशीदिने ।
नक्ते चापि विधिः प्रोक्तः फलाहारे तथैव च ॥
दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
नक्तं तच्च विजानीयात् न नक्तं निशि भोजनम् ॥
नक्षत्रदर्शनान्नक्तं गृहस्थेन विधीयते ।
यतेर्दिनाष्टमे भागे रात्रौ तस्य निषेधनम् ॥"
इति मात्स्ये एकादशीमाहात्म्यम् ॥ * ॥
अथ नक्तव्रतम् ।
"तथा च स्कन्दपुराणे ।
'प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।
उदयात्तु तदा पूज्या हरेर्नक्तव्रते तिथिः ॥'
नियमश्च सामान्यव्रतधर्म्मत्वेनोक्तः ।
'ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्ज्जनम् ॥'
इत्यादिर्ग्राह्यः ॥
नक्तलक्षणञ्च भविष्यदेवीपुराणयोः ।
'हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तभोजी सदाचरेत् ॥'
एवं नक्तव्रतस्य गुरुत्वेन प्रागुक्तवायुपुराण-वचने नक्तमिति हविष्यान्नादिभोजनस्य काल-परं न तु नक्तव्रतपरं तथात्वे उत्तरोत्तरगुरु-व्रतोपदेशप्रस्तावे तदनन्तरं केवलं हविष्यान्नोप-देशानुपपत्तेः । स्मृतिः ।
'नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात्तत् सदिवाकरम् ॥
सदिवाकरन्तु तत् प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तन्तु विज्ञेयं यामार्द्धे प्रथमे सदा ॥'
मार्कण्डेयः ।
'एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन नैवाद्वादशिको भवेत् ॥'
अत्र विष्णुपूजापारणयोरङ्गान्तरापेक्षया प्राधा-न्यमवगम्यते । आनुकल्पिकेऽपि आवश्यक-त्वात् ।" इत्येकादशीतत्त्वम् ॥ * ॥ सौरनक्तकालो यथा,—
"कुशमूलं यवमात्रं स्वच्छायाद्विगुणे च्युते ।
भक्ष्यं मितौदनं नक्तं शुद्धोपवसनं तथा ॥"
इति विधानसप्तमीप्रकरणे तिथ्यादितत्त्वम् ॥
( महादेवः । यथा, महाभारते ।१३।१७।६३।
"नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥"
पुं, पृथोः पुत्त्रः । यथा, ब्रह्माण्डे । ३६ ।
"पृथोश्चापि सुतो नक्तो नक्तस्यापि गयः
स्मृतः ॥" )
नक्तकः, पुं, ( नक्तमिव कायति मलिनतयेति । कै + कः । यद्वा, नज + क्त । ततः स्वार्थे कन् ।) कर्पटः । इत्यमरटीकायां भरतः ॥ न्याकड़ा इति भाषा ॥
नक्तचारी, [ न् ] पुं, ( नक्ते रात्रौ चरतीति । चर + णिनिः । ) विड़ालः । पेचकः । इति त्रिकाण्डशेषः ॥ राक्षसः ॥ रात्रिचरमात्रे, त्रि ॥
नक्तञ्चरः, पुं, (नक्तं चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । ) राक्षसः । इति हलायुधः ॥ गुग्गुलुः । इति जटाधरः ॥ चौरः । पेचकः । ( रात्रिचरमात्रे, त्रि । यथा, मार्क-ण्डेयपुराणे । २६ । २० ।
"नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ॥")
नक्तमालः, पुं, ( नक्तं रात्रौ आ सम्यक्प्रकारेण अलति पर्य्याप्नोतीति । आ + अल + अच् । ) करञ्जभेदः । इत्यमरः । २ । ४ । ४७ ॥ ( यथा, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्त्तितनक्तमाले ॥" )
नक्तमुखा, स्त्री, ( नक्तं नक्तव्रताङ्गं मुखं आदि-भागो यस्याः । ) रात्रिः । इति हलायुधः ॥
नक्तव्रतं, क्ली, ( नक्ते रात्रौ भोजनरूपं यद्व्रतम् । ) दिवाभोजनाभावविशिष्टरात्रिभोजनम् । यथा,
"हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तभोजी षडाचरेत् ॥"
इति भविष्यपुराणम् ॥
नक्ता, स्त्री, ( अनिष्टकारित्वात् नक्तवत् मलिन-त्वमस्त्यस्येति । अच् । टाप् । ) कलिकारी । इति राजनिर्घण्टः ॥ ईशलाङ्गला इति भाषा ॥ ( कलिकारीशब्देऽस्या विवरणं ज्ञातव्यम् ॥ )
नक्रं, क्ली, ( नक्रवत् आकृतिरस्त्यस्येति । अच् । ) अग्रदारु । न्याककाठ इति भाषा । नासिका । इति मेदिनी । रे, ५२ ॥
नक्रः, पुं, ( न क्रामति दूरस्थलमिति । क्रम + अन्येष्वपीति डः । नभ्राड़िति नलोपो न । ) कुम्भीरः । इत्यमरः । १ । १० । २१ ॥ ( यथा, पञ्चतन्त्रे । ३ । ४३ ।
"नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥"
मकरः । यथा, कादम्बर्य्याम् । "तथा चैनाञ्चरेयं नयेत नक्रकेतनः क्षणेनैकेनाकीर्णनीयां दशां जनं चैनम् ॥" ग्राहः । यथा, रघुः । १६।५५।
"स तीरभूमौ विहितोपकार्य्या-
मानायिभिस्तामपकृष्टनक्राम् ॥" )
नक्रराजः, पुं, ( नक्राणां कुम्भीरादीनां राजा श्रेष्ठत्वात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । ) जलजन्तुविशेषः । हाङ्गर इति भाषा । तत्पर्य्यायः । ग्राहः २ जलकिराटः ३ जलाटकः ४ । इति हारा-वली । ७७ ॥
नक्रा, स्त्री, ( नक्रवदाकृतिरस्त्यस्या इति अच् । टाप् । ) नासिका । इति शब्दरत्नावली ॥
नक्षत्रं, क्ली, ( नक्षति शोभां गच्छति स्थानात् स्थानान्तरं गच्छति वा । नक्ष गतौ + "अमि-नक्षियजिवधिपतिभ्योऽत्रन् ।" उणां । ३ ।१०५। इति अत्रन् । ) मुक्ता । इति राजनिर्घण्टः । तारा । तत्पर्य्यायः । ऋक्षम् २ भम् ३ तारा ४ तारका ५ उडु ६ । इत्यमरः । १ । ३ । २१ । तारकम् ७ । इति शाश्वतः ॥ तारः ८ । इति व्याड़िः ॥ दाक्षायण्यः । तास्तु अश्विनी १ भरणी २ कृत्तिका ३ रोहिणी ४ मृगशिरः ५ आर्द्रा ६ पुनर्व्वसुः ७ पुष्यः ८ अश्लेषा ९ मघा १० पूर्व्वफल्गुनी ११ उत्तरफल्गुनी १२ हस्ता १३ चित्रा १४ स्वातिः १५ विशाखा १६ अनुराधा १७ ज्येष्ठा १८ मूला १९ पूर्व्वाषाढ़ा २० उत्तराषाढ़ा २१ श्रवणा २२ धनिष्ठा २३ शतभिषा २४ पूर्व्वभाद्रपदा २५ उत्तरभाद्रपदा २६ रेवती २७ इत्यमरः ज्योतिषञ्च ॥ एता अभिजिता सह अष्टाविंशतिनक्षत्राणि भवन्ति ॥ * ॥ आसां क्रमेणाधिदेवता यथा । अश्वि-१ यम-२ दहन-३ कमलज-४ शशि-५ शूलभृत्-६ अदिति-७ जीव-८ फणि-९ पितरः-१० । योन्य-११ र्य्यमा-१२ दिनकृत्-१३ त्वष्टृ-१४ पवन-१५ शक्राग्नि-१६ मित्राश्च १७ ॥ शक्रो १८ निरृति १९ स्तोयम् २० विश्वविरिञ्चौ २१ हरि-२२ र्व्वसु-२३ र्व्वरुणः-२४ । अजपदो २५ ऽहिर्ब्रध्नः २६ पूषा २७ चेतीश्वरा भानाम् ॥ * ॥ आसां गणा यथा ।
"उग्रः पूर्व्वमघान्तकाः ११ । २० । २५ । १० । २ । ध्रुवगणस्त्वौण्युत्तराणि स्वभू-१२ । २१।२६ । ४ । स्वातादित्यहरित्रयं चरगणः १५ । ७। १२ । २३ । २४। पुष्याश्विहस्ता ८ । १ । १३ । लघुः । चित्रामित्रमृगान्त्यभम् १४ । १७ । ५ । २७ । मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक् ९ । ६ । १८ ।१९। मिश्रोऽग्निः सविशाखभः । ३ । १६ । शुभफला सर्व्वे स्वसंज्ञे गणाः ॥" * ॥
अधोमुखनक्षत्राणि यथा ।
"अश्लेष-९ वह्नि-३ यम-२ पित्र्य-१० विशाख-१६
युक्तम्
पूर्व्वात्रयम् ११ । २० । २५ शतभिषा २४ च
नवाप्युड़ूनि ।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्थ्यभूमिखननेषु च भूषितानि ॥" * ॥
स्वनक्षत्रावधिनक्षत्राणां जन्मसम्पदादिकथनं यथा,—
"जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मभाच्च पुनः पुनः ॥
सर्व्वमङ्गलकार्य्याणि त्रिषु जन्मसु कारयेत् ।
विवादश्राद्धभैषज्ययात्राक्षौराणि वर्ज्जयेत् ॥
यात्रायां पथि बन्धनं कृषि विधौ सर्व्वार्थनाशो
भवेत्
भैषज्ये मरणं तथा सुनियतं दाहो गृहारम्भणे ।
क्षौरे रोगसमागमो बहुविधः श्राद्धेऽर्थनाश-
स्तथा
वादे बुद्धिविनाशनन्त्वरिभयं प्राप्नोत्यसौ
जन्मभे ॥
नक्षत्रोत्पन्नरोगेषु भोगादि यथा,—